## ५६. युवकमण्डले सम्मानः

इव

सतीशः - किं भोः, मन्त्री इव विलम्बेन आगच्छति ?

देवराजः - क्षम्यताम्, विलम्बः अभवत् ।

सतीशः - गजः इव मन्दं चलित्वा आगतवान् वा ?

देवराजः - अहं किं करवाणि ? अहं नगरयानेन आगतवान् । तत् यानं कूर्मः इव मन्दं चलति स्म ।

सतीशः - पानीयं किमपि अपेक्षितं वा ? अथवा केवलं जल्पति ?

देवराजः - भवान् कृपणः इव वचनेन एव समापयति वा अथवा किमपि खादितुम्.....।

सतीशः - किं रे बकासुरः इव सदा खादितुम् इति वदति । भवतु, आगमनकारणं निवेदयतु । अम्ब ! देवराजः आगतवान् । खाद्यम् आनयतु.... ।

देवराजः - अस्माकं स्नेहितः वादिराजः अस्ति खलु । सः कालिदासः इव काव्यं लिखति । शारुहखान इव अभिनयति । हरिवंशराय बच्चनः इव लेखं लिखति । नरेन्द्रकोहली इव उपन्यासं लिखति । एव बहु प्रसिद्धः अस्ति इति ।

सतीशः - तर्हि किं कुर्मः इति वदति ।

देवराजः - तम् अस्माकं युवकमण्डले सम्मानयामः किम् ?

सतीशः - युवकमण्डले चर्चयामः अन्ये अङ्गीकुर्वन्ति चेत् ममापि अङ्गीकारः एव । भवान् तस्य विषयम् उपस्थापयतु ।

देवराजः - अस्तु । तर्हि श्वः मेलिष्यामि ।